रसनालिट्, [ह्] पुं, ( रसनया लेढीति । लिह + क्विप् । ) कुक्कुरः । इति हेमचन्द्रः ॥ रसनया लेहनकर्त्तरि, त्रि ॥

रसनेत्रिका, स्त्री, (रसो नेत्रमिव तद्दस्यस्या इति । रसनेत्र + ठन् ।) मनःशिला । इति हेमचन्द्रः ॥ (मनःशिलाशब्देऽस्या गुणादयो ज्ञेयाः ॥ )

रसपाकजः, पुं, ( रसपाकात् जायते इति । जन् + डः । ) गुड़ः । इति राजनिर्घण्टः ॥

रसफलः, पुं, ( रसो जलं फले यस्य रसयुक्तं फलमस्येति वा । शाकपार्थिववत् मध्यपदलोपी समासः । ) नारिकेलवृक्षः । इति शब्दरत्नावली ॥ (नारिकेलशब्देऽस्य विशेषो विज्ञेयः ॥)

रसभवं, क्ली, ( रसात् रसे वा भवतीति । ) भू + अच् ।) रक्तम् । इति राजनिर्घण्टः ॥

रसमञ्जरी, स्त्री, ( रसानां मञ्जरीव । ) नायकनायिकाभेदकग्रन्थविशेषः । यथा,—
"विद्वज्जनमनोभृङ्गरसशासङ्गहेतवे ।
एषा प्रकाश्यते श्रीमद्भानुना रसमञ्जरी ॥"
इति तस्य द्वितीयः श्लोकः ॥

रसमयः, त्रि, रसस्वरूपः । रसात्मकः रसशब्दात् मयट्प्रत्ययेन निष्पन्नः ॥ ( यथा, भागवते । ३ । ५ । २४ ।
"आधत्तात्मा रसमयं कालमायांशयोगतः ॥")

रसमर्द्दनं, क्ली, ( रसस्य पारदधातोर्मर्द्दनम् । ) पारदपेषणम् । यथा,—
"इष्टिकाचूर्णचूर्णाभ्यामादौ मर्द्यो रसस्ततः ।
दध्ना गुडेन विन्मृत्यराजिकाग्रहधूमकैः ॥"
अन्यच्च ।
"कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्बृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥"
इति भावप्रकाशः ॥

रसमारणं, क्ली, ( रसस्य पारदस्य मारणम् । ) पारदस्य मारणम् । यथा,—
"धूमसारं रसं तोरिं गन्धकं नवसादरम् ।
यामैकं मर्द्दयेदम्लैर्भागं कृत्वा समं समम् ॥
काचकूप्यां विनिःक्षिप्य ताञ्च मृद्वस्त्रमुद्रया ।
विलिप्य परितो वक्त्रे मुद्रां दत्त्वा विशोषयेत् ॥
अधःसच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीवालुकापूरैर्भृत्वा वा कूपिकागलम् ॥
निवेश्य चुल्ल्यां तदधो वह्निं कुर्य्याच्छनैः शनैः ।
तस्मादप्यधिकं किञ्चित् पावकं ज्वालयेत् क्रमात् ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत् स्वाङ्गशीतं तमूर्द्ध्वगं गन्धकं त्यजेत् ॥
अधस्थञ्च मृतं सूतं गृह्णीयात् तत्तु मात्रया ।
यथोचितानुपानेन सर्व्वकर्म्मसु योजयेत् ॥"
इति भावप्रकाशः ॥

रसमूर्च्छनं, क्ली, ( रसस्य पारदस्य मूर्च्छनम् । ) पारदस्य मूर्च्छाकरणम् । यथा,—
"तुल्यं त्रिफलावन्ध्याकन्दैः क्षुद्रद्वयान्वितैः ।
चित्रकोऽर्कनिशाक्षारकन्याकनकद्रवैः ॥
सूतं कृत्वेन यत्नेन वारान् सप्ताभिमूर्च्छयेत् ।
इत्थं संमूर्च्छितः सूतस्त्यजेत् सप्तापि कञ्चुकान् ॥"
इति भावप्रकाशः ॥
( तथास्य विवृतिः ।
"गन्धकेन रसं प्राज्ञः सुदृढं मर्द्दयेद्भिषक् ।
कज्जलाभो यदा सूतो विहाय घनचापलम् ॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः ।
असौ रोगत्रयं हन्यादनुपानस्य योगतः ॥"
इति मूर्च्छनम् ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥ )

रसराजः, पुं, ( रसानां धातूनां राजा इति । "राजाहःसखिभ्यष्टच् ।" ५।४।९१। इति टच् ।) पारदः । रसाञ्जनम् । इति राजनिर्घण्टः ॥

रसलेहः, पुं, ( रसान् अपरान् धातून् लेढीति । लिह + पचाद्यच् । ) पारदः । इति राजनिर्घण्टः ॥

रसवती, स्त्री, (रसो विविधस्वादरसो विद्यतेऽस्यामिति । रस + "रसादिभ्यश्च ।" ५ । २ । ९५ । इति मतुप् । मस्य वत्वम् । ) महानसम् । इत्यमरः ॥ ( यथा, सांख्यतत्त्वकौमुद्याम् । ५ । "यथा धूमादग्नित्वसामान्यविशेषः पर्व्वते अनुमीयते तस्य च वह्नित्वसामान्यविशेषस्य स्वलक्षणो वह्निविशेषो दृष्टो रसवत्याम् ॥*॥") रसविशिष्टे, त्रि ॥ (यथा, आर्य्यासप्तशत्याम् ।४९८। "रोषोऽपि रसवतीनां न कर्कशो वा चिरानुबन्धी वा ॥" )

रसशोधनं, क्ली, ( रसः शोध्यतेऽनेनेति । शुध् + णिच् + ल्युट् । रसं पारदं शोधयत्यनेनेति वा ।) टङ्कणः । इति हेमचन्द्रः ॥ (रसस्य शोधनम् ।) पारदशुद्धिः । यथा,—
"कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्बृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥
एवं कदर्थितः सूतः षण्ढो भवति निश्चितम् ।
बह्वौषधीकषायेण स्वेदितः स बली भवेत् ॥
सर्पाक्षीचित्रिकाबन्ध्याभृङ्गारैः स्वेदितो बली ।
ततः सपावकद्रावैः खिन्नः स्यादतिदीप्तिमान् ॥"
इति भावप्रकाशः ॥
( मतान्तरम् ।
"जयन्त्या वर्द्धमानस्य चार्द्रकस्य रसेन च ।
वायस्याश्चानुपूर्व्व्यैवं मर्द्दनं रसशोधनम् ॥
एषां प्रत्येकशस्तावन्मर्द्दयेत् खरसेन च ।
यावच्च शुष्कतां याति सप्तवारं विचक्षणः ॥
उद्धृत्योष्णारनालेन मृद्भाण्डे क्षालयेत् सुधीः ।
सर्व्वदोषविनिर्म्मुक्तः सप्तकञ्चुकवर्ज्जितः ॥
जायते शुद्धसूतोऽयं युज्यते सर्व्वकर्म्मसु ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रससिन्दूरं, क्ली, ( रसजातं सिन्दूरमिति । ) औषधविशेषः । तस्य नामान्तरं सिन्दूररसः । यथा,—
"शुद्धसूतस्य गृह्णीयाद्विशद्भागचतुष्टयम् ।
शुद्धगन्धस्य भागैकं तावत् कृत्रिमगन्धकम् ॥
अथवा पारदस्यार्द्धं शुद्धगन्धकमेव हि ।
तयोः कज्जलिकां कुर्य्याद्दिनमेकं विवर्ज्जयेत् ।
मृत्तिकां वाससा सार्द्धं कुट्टयेदतियत्नतः ।
तया वारत्रयं सम्यक् काचकूपीं प्रलेपयेत् ॥
मृत्तिकां शोषयित्वा तु कूप्यां कज्जलिकां क्षिपेत् ।
तां कूपीं वालुकायन्त्रे स्थापयित्वा रसं पचेत् ॥
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम् ।
गृह्णीयादूर्द्ध्वसंलग्नं सिन्दूरसदृशं रसम् ॥"
इति भावप्रकाशः ॥
(मतान्तरम् ।
"पृथक् समं समं कृत्वा पारदं गन्धकन्तथा ।
नवसारं धूमसारं स्फटिकं याममात्रकम् ॥
निम्बूरसेन संमर्द्य काचकूप्यां निवेशयेत् ।
मुखे पाषाणखटिकां दत्त्वा मुद्रां प्रलेपयेत् ॥
सप्तभिर्मृत्तिकावस्त्रैः पृथक्संशोष्य वेष्टयेत् ।
सच्छिद्रायां मृदस्थाल्यां कूपिकां तां निवेशयेत् ।
पूरयेत् सिकतापूरैरागलं मतिमान् भिषक् ।
निवेश्य चुल्ल्यां दहनं मन्दं मध्यं खरं क्रमात् ॥
प्रज्वाल्य द्वादशं यामं स्वाङ्गशीतं समुद्धरेत् ।
स्फोटयित्वा तु मुक्ताभमूर्द्ध्वलग्नं वलिं त्यजेत् ।
अधःस्थं रससिन्दूरं सर्व्वरोगेषु योजयेत् ॥"
इति रससिन्दूरम् ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रसस्थानं, क्ली, ( रसः स्थानमाधार उत्पत्तिस्थानं यस्य । रसस्य पारदस्य स्थानमित्येके । ) हिङ्गुलम् । इति शब्दचन्द्रिका ॥ शरीरस्य रसस्थलञ्च । तस्य प्रमाणं रसशब्दे द्रष्टव्यम् ॥

रसा, स्त्री, (माधुर्य्यादिरूपो विविधो रसोऽस्त्यस्यामिति । "अर्श आदिभ्योऽच् ।"५ । २ । १२७ । इति अच् । रसति शब्दायते इति वा । रस + अच् । टाप् च । ) पृथिवी । इत्यमरः ॥ रसना । (तत्पर्य्यायो यथा, भावप्रकाशे ।१।१। "रास्ना युक्तरसा रस्या सुवहा रसना रसा । एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥") पाठा । (अस्याः पर्य्यायो यथा, भावप्रकाशे ।१।१। "पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका । एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥" शल्लकी । ( अस्याः पर्य्यायो यथा,— "शल्लकी गजभक्ष्या च सुवहा सुरभी रसा । महेरुणा कुन्दुरुकी वल्लकी च बहुस्रवा ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ ) कङ्गुः । इति मेदिनी ॥ द्राक्षा । काकोली । इति शब्दरत्नावली ॥ ( रसातलम् । यथा, भागवते । १० । ६ । १२ ।
"रसा दिशश्च प्रतिनेदिरे जनाः
पेतुः क्षितौ वज्रनिपातशङ्कया ॥"
यथा च तत्रैव । ३ । १३ । १६ ।